श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

विल्लूर् नडादूर् श्री करुणाकराचार्य विरचितम्

# ॥ श्रीसत्यव्रतपुरी (कारुकुरुची) नाथश्रीदेवराजाष्टकम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीसत्यव्रतपुरी (कारुकुरुची) नाथश्रीदेवराजाष्टकम् ॥

वेदानां मस्तके घुष्टं सत्यमित्येकमद्भुतम्।
सत्यव्रतपुरे दृष्टं लुनीतां शोकसन्ततिम्॥ १ ॥

शेषभोगं परित्यज्य श्रिया सह महीतले।
सत्यव्रतपुरे तिष्ठत् भातु मे वस्तु निस्तुलम्॥ २ ॥

जलजामण्डितं वक्षः जलजेनाङ्कितः करः।
जलेषु च दया यस्य भजे तं सत्यपुःप्रभुम्॥ ३ ॥

भारतीवन्दितं देवं भावये वरदप्रभुम्।
भारवोढिति यो गीतो भवभीतिमतां सताम्॥ ४ ॥

स्वर्धुनीसूतिकामीशशिरोभूषणमाद्रिये।
सत्यव्रतपुराधीशपदपद्मयुगं सदा॥ ५ ॥

दुदूत च सुसूतेति भक्तानां वशगस्स्वयम्।
वर्ण्यते सत्यनाथोऽयं वन्दा इममतः प्रभुम्॥ ६ ॥

अधमर्णधिया देव आहूतोऽपि भवेदसौ।
इति गीतगुणं नाथं ईडे सत्यपुरप्रभुम्॥ ७ ॥

श्रिया सह सदा जुष्टः भक्तानां क्लेशनाशनः।
सत्यव्रतपुराधीशः सौतु मे क्षेमसन्ततिम्॥ ८ ॥

धनुष्पुरीनाथकवीश्वरस्य सत्कृपाबलादेव कृपाकरशिशुः।
चकार सत्यव्रतदिग्गजं सतां मुकुन्दपादाब्जतृषावतां मुदे॥ ९ ॥

॥ इति श्रीसत्यव्रतपुरी (कारुकुरुची) नाथश्रीदेवराजाष्टकं समाप्तम्॥

www.prapatti.com